कार्षापणसहस्राणि तस्य मूल्यं चतुर्द्दश ॥
बालादित्यद्युतिनिभः कर्षं यस्तु प्रतुल्यते ।
कार्षापणशतानान्तु मूल्यं सद्भिः प्रकीर्त्तितम् ॥
यस्तु दाड़िमपुष्पाभः कर्षार्द्धेन तु सम्मितः ।
कार्षापणशतानान्तु विंशतिर्मूल्यमादिशेत् ॥
चत्वारो माषका यस्तु रक्तोत्पलदलप्रभः ।
मूल्यं तस्य विधातव्यं सूरिभिः शतपञ्चकम् ॥
द्विमाषको यस्तु गुणैः सर्व्वैरेव समन्वितः ।
तस्य मूल्यं विधातव्यं द्विशतं तत्त्ववेदिभिः ॥
माषकैकमितो यस्तु पद्मरागो गुणान्वितः ।
शतैकसम्मितं कार्य्यं मूल्यं रत्नविचक्षणैः ॥
अतो न्यूनप्रमाणास्तु पद्मरागा गुणोत्तराः ।
स्वर्णद्विगुणमूल्येन मूल्यं तेषां प्रकल्पयेत् ॥
कार्षापणः समाख्यातः पुराणद्वयसम्मितः ।
अन्ये कुसुम्भपानीयमञ्जिष्ठोदकसन्निभाः ॥
काषाया इति विख्याताः स्फाटिकप्रभवाश्च ते ।
तेषां दोषो गुणो वापि पद्मरागवदादिशेत् ॥
मूल्यमल्पन्तु विज्ञेयं धारणेऽल्पफलं तथा ।
ब्रह्मक्षत्रियवैश्यान्त्याश्चतुर्द्धा ये प्रकीर्त्तिताः ॥
चतुर्व्विधैर्नृपतिभिर्द्धार्य्याः सम्पत्तिहेतवे ।
अतोऽन्यथा धृतः कुर्य्याद्रोगशोकभयव्ययम् ॥"
इति युक्तिकल्पतरुः ॥
(यथा, कथासरित्सागरे । २६ । ४४ ।
"सोऽपि प्राप्तस्तदाचीर्ण्णमाणिक्यस्तम्भभास्वरम् ।
सौवर्णभित्ति सद्रत्नकेतनं सम्पदामिव ॥"
कदलीविशेषः । तद्यथा,—
"माणिक्यमर्त्त्यामृतचम्पकाद्या
भेदाः कदल्या बहवोऽपि सन्ति ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

माणिक्या, स्त्री, (माणिक्य + टाप् ।) ज्येष्ठी । तत्पर्य्यायः । मुषली २ गृहगोधिका ३ गृहगोलिका ४ भित्तिका ५ पल्ली ६ कुड्यमत्स्यः ७ गृहोलिका ८ । इति हेमचन्द्रः । ४ । ३६४ ॥

माणिबन्धं, क्ली, (मणिबन्धे गिरौ भवम् । मणिबन्ध + अण् ।) सैन्धवलवणम् । इत्यमरटीकायां स्वामी ॥

माणिमन्थं, क्ली, (मणिमन्थगिरौ भवम् । मणिमन्थ + अण् ।) सिन्धुलवणम् । इत्यमरः । २।९।४२ ॥ (अस्य पर्य्यायः ।
"सैन्धवोऽस्त्री शीतशिवं माणिमन्थञ्च सिन्धु-जम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

मातङ्गः, पुं, (मतङ्गस्येदं । मतङ्गस्यापत्यं पुमान् वा । मतङ्ग + अण् ।) हस्ती । इत्यमरः । २।८। ३९ ॥ (यथा, रामायणे । १ । ६ । २३ ।
"विन्ध्यपर्व्वतजैर्मत्तैः पूर्णा हैमवतैरपि ।
मदान्वितैरतिबलैर्मातङ्गैः पर्व्वतोपमैः ॥")
अन्त्यजश्च । किरातजातिविशेषः । इति तट्टीकायां मथुरेशः ॥ श्वपचः । इति मेदिनी । गे, ४७ ॥ (यथा, कथासरित्सागरे । ७३ । २ ।
"सुदूरमन्वगायातं कार्य्याय कृतसंविदम् ।
सख्या दुर्गपिशाचेन मातङ्गपतिना युतम् ॥")
अर्हदुपासकविशेषः । इति हेमचन्द्रः ।४।२८३।

मातङ्गमकरः, पुं, (मातङ्गाकारो मकरः ।) महामत्स्यभेदः । इति राजनिर्घण्टः ॥

मातङ्गी, स्त्री, (मतङ्गस्य मुनेरपत्यं स्त्री । मातङ्ग + अण् ङीष् ।) दशमहाविद्यान्तर्गतनवमविद्या । अथ मातङ्गीमन्त्रः । वामकेश्वरतन्त्रे ।
"अथ वक्ष्ये महादेवीं मातङ्गीं सर्व्वसिद्धिदाम् ।
यस्योपासनमात्रेण वाक्सिद्धिं लभते ध्रुवम् ॥
प्रणवञ्च ततो मायां कामबीजञ्च कूर्च्चकम् ।
मातङ्गी ङेयुता चान्ते वह्निजायावधिर्मनुः ॥
ऋषिः स्याद्दक्षिणामूर्त्तिर्विराट् छन्दः प्रकीर्त्तितम् ।
मातङ्गीदेवता देवी सर्व्वसिद्धिप्रदायिनी ॥
अङ्गन्यासकरन्यासौ कुर्य्यान्मन्त्री समाहितः ।
षड्दीर्घभाजा बीजेन प्रणवाद्येन कल्पयेत् ॥
षट्कोणाष्टदलं पद्मं लिखेद्यन्त्रं मनोरमम् ।
तत्र पूजा प्रकर्त्तव्या जवापुष्पेण मन्त्रवित् ॥
अष्टशक्तीश्चाष्टदले पूजयेत् सुसमाहितः ।
रतिः प्रीतिर्मनोभवा क्रिया श्रद्धा च शक्तयः ॥
अनङ्गकुसुमानङ्गमदना मदनालसा ।
इत्यष्टशक्तीः संपूज्य उपहारसमन्वितः ॥
ततो देवीं परां ध्यायेत् साधकः स्थिरमानसः ।
श्यामाङ्गीं शशिशेखरां त्रिनयनां रत्नसिंहासनस्थिताम् ।
वेदैर्बाहुदण्डैरसिखेटकपाशाङ्कुशधराम् ॥
एवं ध्यात्वा महादेवीं गन्धपुष्पैर्मनोरमैः ।
नैवेद्यन्तु महादेव्यै पायसं शर्करान्वितम् ॥
पुरश्चरणकाले तु षट्सहस्रं मनुं जपेत् ।
तद्दशांशं हुनेदाज्यैः शर्करामधुभिः सह ॥
ब्रह्मवृक्षोद्भवैः काष्ठैः साधकः शक्तिभिः सह ।
एवं पुरश्क्रियां कृत्वा प्रयोगविधिमाचरेत् ॥
चतुष्पथे श्मशाने वा कलामध्ये च मान्त्रिकः ।
मत्स्यं मांसं पायसञ्च दद्याद्धूपञ्च गुग्गुलुम् ॥
रात्रियोगेन कर्त्तव्यं सदा पूर्णञ्च साधकः ।
एवं प्रयोगमात्रेण कविता जायते ध्रुवम् ॥
अग्निस्तम्भं जलस्तम्भं वाक्स्तम्भं कारयेत् ध्रुवम् ।
मन्त्री जयति शत्रूंश्च तार्क्ष्यो भोगिकुलं यथा ॥
शास्त्रे वादे कवित्वे च बृहस्पतिरिवापरः ।
अनेनैव विधानेन मातङ्गी सिद्धिदायिनी ॥
गनं तद्गृहमागत्य कुवेरैर्दीयते वसु ।
विना मत्स्यैर्विना मांसैर्नार्च्चयेत् परदेवताम् ॥"
इति तन्त्रसारः ॥

मातरपितरौ, पुं, (माता च पिता च । "मातर पितरावुदीचाम् ।" ६ । ३ । ३२ । इत्यारङादेशो मातृशब्दस्य निपात्यते ।)तातजनयित्र्यौ । नित्यद्विवचनान्तौ । इत्यमरः । २ । ६ । ३७ ॥

मातरिश्वा, पुं, (मातरि अन्तरीक्षे श्वयति वर्द्धते इति । यद्वा, मातरि जनन्यां श्वयति वर्द्धते सप्तसप्तकत्वादिति । श्वि + "श्वन् उक्षन्निति ।" उणा० १ । १५८ । इति कनिन् । नाम्नि सप्तम्या अलुक् । धातोरिकारलोपश्च निपातितः ।) वायुः । इत्यमरः । २ । ४ ।६४। (यथा, ऋग्वेदे । १ । ९३ । ६ ।
"आन्यं दिवो मातरिश्वाजभारामथ्नादन्यं परिश्येनो अद्रेः ॥"
"मातरिश्वा वायुः ।" इति तद्भाष्ये सायनः ॥ मातर्य्यन्तरिक्षे श्वसिति चेष्टते इति । श्वस् + कनिन् । अग्निभेदः । यथा, ऋग्वेदे ।३।२९।११।
"तनूनपादुच्यते गर्भ आसुरो
नराशंसो भवति यद्विजायते ।
मातरिश्वा यदमिमीत मातरि
वातस्य सर्गो अभवत् सरीमणि ॥"
"यदाग्निररण्योस्तु गर्भरूपतया वर्त्तते तदा तनूनपान्नामको भवति यदान्तरिक्षे विद्योतते तदा मातरिश्वनामको भवति ।" इति तद्भाष्ये सायनः ॥)

मातलिः, पुं, (मतं लातीति । ला + कः । पृषोदरादित्वात् साधुः । मतलस्यापत्यं पुमानिति वा । मतल + "अत इञ् ।" ४ । १ । ९५ । इतीञ् ।) इन्द्रसारथिः । इत्यमरः ।१।१।३८॥ (यथा, महाभारते । ५ । ९७ । ११ ।
"मतस्त्रिलोकराजस्य मातलिर्नाम सारथिः ।
तस्यैकैव कुले कन्या रूपतो लोकविश्रुता ॥")

माता, [ऋ] स्त्री, मान्यते पूज्यते या सा । मान इ पूजायां नाम्नीति डातृ इति भरतः ॥ (यद्वा, "नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ ।" उणा० २ । ९६ । इति तृच् । निपातितश्च । स्वस्रादित्वान्ङीप् निषेधः ।) मा इति भाषा । तत्पर्य्यायः । जनयित्री २ प्रसूः ३ जननी ४ । इत्यमरः । २ । ६ । २९ ॥ सवित्री ५ जनिः ६ जनी ७ जनित्री ८ अक्का ९ अम्बा १० अम्बिका ११ अम्बालिका १२ । इति शब्दरत्नावली ॥ मातृका १३ । इति जटाधरः ॥ * ॥ षोड़शप्रकारा मातरो यथा,—
"स्तनदात्री गर्भधात्री भक्ष्यदात्री गुरुप्रिया ।
अभीष्टदेवपत्नी च पितुः पत्नी च कन्यका ॥
सगर्भजा या भगिनी पुत्त्रपत्नी प्रियाप्रसूः ।
मातुर्माता पितुर्माता सोदरस्य प्रिया तथा ॥
मातुः पितुश्च भगिनी मातुलानी तथैव च ।
जनानां वेदविहिता मातरः षोड़श स्मृताः ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे कार्त्तिकेयसंवादे १५ अध्यायः ॥ तस्या गौरवं यथा,—
"जनको जन्मदातृत्वात् पालनाच्च पिता स्मृतः ।
गरीयान् जन्मदातुश्च योऽन्नदाता पिता मुने ॥
विनान्नमन्वरो देहो न नित्यः पितुरन्नजः ।
तयोः शतगुणै माता पूज्या मान्या च वन्दिता ।
गर्भधारणपोषाभ्यां सा च ताभ्यां गरीयसी ॥"
इति तत्रैव ४० अध्यायः ॥
अपि च ।
"स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति ।
उपनीय ददद्वेदमाचार्य्यः स प्रकीर्त्तितः ॥
एकादश उपाध्याया ऋत्विग्यज्ञकृदुच्यते ।
एते मान्या यथापूर्व्वमेभ्यो माता गरीयसी ॥"
इति गारुड़े ९४ अध्यायः ॥